# Shrirama Kavacham

# શ્રીરામકવચમ્

## Document Information

Text title : Rama Kavacham 3

File name : rAmakavacham3.itx

Category : raama, vAdirAja, kavacha

Location : doc_raama

Author : vAdirAjayati

Proofread by : Gayathri Veda, Revathy R.

Latest update : June 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2024

*sanskritdocuments.org*

# શ્રીરામકવચમ્

કપિકટકધુરીણઃ કાર્મુકન્યસ્તબાણઃ
ક્ષપિતદિતિજસૈન્યઃ ક્ષત્રિયેષ્વગ્રગણ્યઃ ।
જલધિરચિતસેતુર્જાનકીતોષહેતુઃ
પથિ પથિ ગુણસાન્દ્રઃ પાતુ માં રામચન્દ્રઃ ॥ ૧॥

શ્રીમત્કિરીટવિભ્રાજિશિરા રામઃ શિરોઽવતુ ।
કુટિલાલકસંશોભિલલાટાન્તઃ સુરાર્થિતઃ ॥ ૨॥

માણિક્યમૌક્તિકોદ્ભાસિતિલકઃ સૂર્યવંશજઃ ।
લલાટં પાતુ સુભ્રૂર્મે કૌસલ્યાનન્દનો ભ્રૂવૌ ॥ ૩॥

ધનુર્વિદ્યાપારદૃશ્વા નેત્રે પાત્વબ્જલોચનઃ ।
લસન્નાસાપુટો નાસાં વિશ્વામિત્રવૃતોઽવતુ ॥ ૪॥

બિમ્બોષ્ઠોઽવ્યાન્મદીયૌષ્ઠૌ શમ્ભુકાર્મુકભઞ્જનઃ ।
કુન્દકોશલસદ્દન્તો દન્તાન્મે જાનકીપતિઃ ॥ ૫॥

મનોજ્ઞરસનો જિહ્વાં પાતુ લોકમયાન્તકૃત્ ।
વાચં વ્યાખ્યાવિદગ્ધોઽવ્યાચ્ચ્યક્તસામ્રાજ્યસમ્ભ્રમઃ ॥ ૬॥

આસ્યં ચન્દ્રોપમાસ્યોઽવ્યાદ્રામચન્દ્રો વનેચરઃ ।
કમ્બુગ્રીવોઽવતુ ગ્રીવાં ખરદૂષણસૈન્યજિત્ ॥ ૭॥

ચારુદીર્ઘકરઃ પાણી મારીચમૃગલુબ્ધકઃ ।
કઙ્કણાઙ્ગદમુદ્રાઢ્યોઽઙ્ગુલીસ્ત્યક્તપ્રિયાકૃતિઃ ॥ ૮॥

પાતુ પીનાંસયુગ્મોઽસૌ હનૂમન્નયનોત્સવઃ ।
હારકૌસ્તુભભૃત્કણ્ઠમૂલં સુગ્રીવસખ્યકૃત્ ॥ ૯॥

ઉરઃ પાતુ મહોરસ્કઃ તાલાત્માસુરખણ્ડનઃ ।
મધ્યં કૃશલસન્મધ્યઃ પાતુ વાલ્યઙ્ગભેદનઃ ॥ ૧૦॥

દર્ભશાયી વિભુઃ પાતુ વલીસ્ત્રિવલિપલ્લવઃ ।
તનુદરઃ પાતુ કુક્ષિં કૃતસેતુર્મહાર્ણવે ॥ ૧૧॥

નિમ્નનાભિઃ પ્રભુઃ પાતુ નાભિં કપિચમૂપતિઃ ।
પીતામ્બરઃ સ્ફુરત્કાઞ્ચીદ્યોતમાનકટિદ્વયઃ ॥ ૧૨॥

ઙ્કાપ્રાકારનિર્ભેદી રામઃ પાત કટિં મમ ।
ઊરૂ કરિકરોરુર્મે ચારુબાણધનુર્ધરઃ ॥ ૧૩॥

જૃમ્ભિરાવણસૈન્યાબ્ધિકુમ્ભસમ્ભવકોટિધૂઃ ।
જાનુની વૃત્તવિલસજ્જાનુયુગ્મો મમાવતુ ॥ ૧૪॥

કમ્ભકર્ણાદિનિર્ભઙ્ગદમ્ભોળાસમસાયકઃ ।
જઙ્ઘે તુઙ્ગેભદન્તાભજઙ્ઘાયુગ્મોઽવતુ પ્રભુઃ ॥ ૧૫॥

દશાનનશિરોરણ્યપરશ્વધપરાક્રમઃ ।
મુક્તાઙ્કુરસમશ્રીમદ્ગુલ્ફો ગુલ્ફૌ મમાવતુ ॥ ૧૬॥

સસમ્ભ્રમસુરશ્રેણીશિરોજુષ્ટાઙ્ઘ્રિપલ્લવઃ ।
પાદૌ રક્ષતુ મે નિત્યં વિભીષણપદપ્રદઃ ॥ ૧૭॥

નખાન્ પાતુ નખશ્રેણીશશિદ્યોતિતદિઙ્મુખઃ ।
અગ્નિજ્વાલોદિતસ્વીયસીતો વીતચ્છિદાકૃતિઃ ॥ ૧૮॥

રક્તપાદતલાદિત્યઃ પાતુ પાદતલે મમ ।
પ્રાપ્તાયોધ્યાપુરૈશ્વર્યઃ પ્રાચ્યાં પાતુ મનોરમઃ ॥ ૧૯॥

ધર્મપ્રવર્તકઃ પાયાદવાચ્યાં નીરદદ્યુતિઃ ।
પાતુ પ્રતીચ્યાં યજ્વીન્દ્રો હનૂમત્પારમેષ્ઠયદઃ ॥ ૨૦॥

ઉદીચ્યામુદ્ધતાયોગવિદેહતનયાપ્રિયઃ ।
અધોઽધઃકૃતપાપૈઘઃ પાતુ રામોઽખિલાગ્રણીઃ ॥ ૨૧॥

ઊર્ધ્વમુન્નીતસજ્જીવનાનાસઙ્ઘસુખપ્રદઃ ।
ય ઇદં રઘુનાથસ્ય કવચં બિભૃયાન્નરઃ ॥ ૨૨॥

યતિના વાદિરાજેન રચિતં નિર્મલં દૃઢમ્ ।
સ્પ્રષ્ટું તં નૈવ રક્ષાંસિ પાપાનિ રિપવોઽપિ વા ॥ ૨૩॥

વિપદો વ્યાધયો વાઽપિ શક્નુવન્તિ શરોપમાઃ ।
અરિં જિત્વા તુ સંસારં યાસ્યત્યન્તેઽપુનર્ભવમ્ ॥ ૨૪॥

ઇતિ શ્રીમદ્વાદિરાજપૂજ્યચરણવિરચિતં
શ્રીરામકવચં સમ્પૂર્ણમ્ ।

ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ।

Proofread by Gayathri Veda

---

*Shrirama Kavacham*

pdf was typeset on June 8, 2024

Please send corrections to *sanskrit@cheerful.com*